मान्यत्वप्रसंगात्। तस्मात्। सकलगोव्यक्तिषु नृत्तप्रत्ययजनकं तत्रैवप्रत्येकं परिसमाप्यावर्त्तमानं सामान्यमेव गोत्वं शक्यं। तस्मादेतदिति नामकरणे नाममात्रे निद्येत नार्थइति। मतोनाद्यः पक्षः श्रेयान्। नापि द्वितीयो गोत्वादेः। क्वचिद्धि द्वयेषु वृत्तप्रत्ययो गत्वज्ञानावानुपगमे परमतसंवेत्तानुपपत्तेश्च। किंचगवादयोयेसामान्यशब्दायेचशाबलेयादयस्तेषांनवदनिषोयेणपर्यायतास्मादर्थनिदानावाद्यपादपादिशब्दवत्। नखलुतुल्यज्ञानवपनेदोयुक्तोवस्तुन्यपि। संसृष्टंह्येकनानात्वादिविकल्पानांवृत्तीतेः नेदेवाग्ज्ञानवपवस्तुतापत्तिप्रसङ्गात्वस्तुत्वप्रत्यापोह्यलक्षणसंवेदनेदाद्वैदः। ॥७६॥

यमेयादिशब्दानामघटनिमंगात्। अघटेद्यस्मात्तद्रूपेणाप्यघमेयादिरूपत्वे। ततोमवलेदायोगात्। कथंतन्नसंवेद्यनिदाद्वैदः। किंचशावलेयादिष्वेकोपोह्योनवसङ्केतः। किंवृत्तिव्यक्तिष्वेवास्यादर्थसौवलेयादयस्तन्निदंति। तर्हिशाद्यर्थोपि नेदकामानुवृत्तायस्मात्तरंगाः शाबलेयादमेनदेदकास्तस्माच्छाद्यर्थोनेदकाइत्यति साहसंवस्तुनोपिसंवेद्यनेदाद्वैदोनोपलप्सेः किमुतावस्तुनि। तथाह्येकएवदेवद त्तादिः कटककुंडलादिभिरनिसंवध्यमानोनानात्वमास्तिघ्नुवानः समुपलप्यतइ। ति। नवतुवासंवेद्यनेदाद्वैदस्तथापितवस्तुसूत्सामान्यमंतरेणान्यापोह्याश्रयः संवे।

धीनवतांनविरुद्धमर्हति।तथाहि।यदिशावलेयादिषुवस्तुनृतसारूपान्नावोश्वादिप
रिहारेणतत्रैवविशिष्टाभिधानप्रत्ययोकथंस्यात्॥ततःसंवेधिनेदाऽदमिष्ठतापिसा
मान्यंवास्तवमंगीकर्तव्यमिति॥किंचापोहशब्दार्थपक्षेसंकेतोवानुपपन्नस्तद्ग्रहणो
पायासंभवात्।नप्रत्यक्षंतद्ग्रहणसमर्थंतस्यवस्तुविषयत्वादतापोहस्यचावस्तुत्वादत
मानमपितत्संज्ञावभववोधइति।तस्यकार्यस्वभावलिंगसंपाद्यत्वादपोहस्यनिरू-
पाख्यत्वेनानर्थक्रियाकारित्वेनचस्वभावकार्ययोरसंभवात्।किंच गोशब्दस्यागोपो
हाभिधायित्वेगौरित्पन्नगोशब्दस्यकिमभिधेयंस्यादज्ञातस्यविधिनिषेधयोरनधिकृ ।।99।।

रात्॥अगोनिवृत्तिरितिचेदितरेतराश्रयत्वमगोव्यवच्छेदोहिअगोनिश्चयेसतिभवति॥
सचागोगोनिवृत्यात्मा॥गौश्चागोव्यवच्छेदरूपयति॥अगौरित्पन्नोनरपक्षार्थेपिनये
वदिशाचिंतनीयस्तत्रगौरित्पन्नात्पूर्वविधिरूपोगोशब्दाभिधेयस्तदापोहःशब्दा
र्थइतिविघटेतत्तस्मादपोहस्योक्तयुक्त्याविचार्यमाणस्यायोगात्नापोहःशब्दार्थ
इतिसिद्धं॥महाऽयोगपतावच्छब्दादपोवस्तुप्रतिपत्तिहेतवइति।।अप्रतिरूपहेते
र्यंत्रप्रतिनिज्ञानवज्ञात्रमितिनिरूपचिंतालैंगिकंसंगतार्थंविवक्षतंदेव
वाचारचितमुचितवाग्भिस्तथ्यमेतेनगीतं॥इतिपरीक्षामुख्यमालघुवृत्तौपंचमःपरि

डाक्टर भाऊदाजी रिसर्च इन्स्टिट्यूट
DR BHAU DAJI
MEMORIAL

चमृतीयःसमुद्देशाःन्न॥अथस्वरूपसंख्याविप्रतिपत्तिनिराकरणार्थविषयविप्रतिपत्तिनि-
रासार्थमाह॥सामान्यविशेषात्मातदर्थोविषयः॥तत्प्रमाणंसमूहोर्थोविषयइति
यावत्॥सएवविशिष्यते॥सामान्यविशेषात्मा॥सामान्यविशेषौवक्ष्यमाणलक्षणौतावा
त्मानौयस्येतिविग्रहः॥तदुभयग्रहणमात्मग्रहणंचकेवलस्यसामान्यस्यविशेषस्यतदु
भयस्यवास्वतंत्रस्यप्रमाणविषयत्वप्रतिषेधार्थं॥तत्रसन्मात्रंदेहस्यपरमब्रह्मणोनिर
स्तत्वान्नदितरद्विधार्य्यते॥तत्रसांख्यैःप्रधानंसामान्यमुक्तं॥त्रिगुणमविवेकिविषयः॥
सामान्यमविचेतनंप्रसवधर्मिमियुक्तंतथाप्रधानंतद्विपरीतस्तथाचपुमानितिवचनात् ॥७८॥

नचकेवलंप्रधानंमहदादिकार्य्यनिःपादनायप्रवर्तमानंकिमप्यपेक्षाप्रवर्तते॥निरपेक्षं
वाप्रथमपक्षेतन्निमित्तंवाच्यं॥यदपेक्षाप्रवर्तते॥ननुपुरुषार्थएवतन्नकारणंपुरुषार्थेन
हेतुनाप्रधानंप्रवर्तते॥पुरुषार्थस्यहेधात्रादृष्टाद्युपलब्धिर्गुणपुरुषांतरविवेकदर्शनंचे
त्यभिधानादितिचेत्॥सत्यं॥तथाप्रवर्तमानमपिवकुधानंकंपुरुषकृतंकंचिदुपकार
ममासादयत्प्रवर्तेतानासादयत्॥अथमपक्षेसनुपकारस्तस्माद्भिन्नोभिन्नोवायदिभिन्न
स्तदातस्येतिव्यपदेशाभावःसंबंधाभावातदभावश्चसमवायादेरनभ्युपगमात्॥तदा-
त्मंचनेदंविरोधीति॥अथाभिन्नउपकारइतिपक्षआश्रीयते॥तदाप्रधानमेवतेनकृ॥

तंसात्॥अथोपकारनिरपेक्षमेवप्रधानंप्रवर्तते॥तर्हिमुक्तात्मानंप्रत्यपिप्रवर्त्तेताविशे-
षादेतन्निरपेक्षप्रवृत्तिपक्षोपिप्रत्युक्तस्ततएव॥किंचसिद्धेप्रधानेसर्वमेतदुपपद्यतेसा-
न्यथतत्सिद्धी॥कुतश्चेतिश्रीयतेऽतिमनुकार्याणामेकान्वयदर्शनादेककारणप्रभव
त्वं॥नेदानींपरिणामदर्शनाच्चेतितदप्यचारुचर्चितंमुधैवदुःखमोहरूपतयाघटादेरन्व
यानावादेतत्स्वप्नेवतथोपलंभात्॥अथांतस्तत्त्वस्वप्नमुखादिपरिणामः॥किंत्वतथा
परिणममानप्रधानसंसर्गाद्विज्ञानोपितथाप्रतिभासतेति॥तदप्यनुपपन्नमप्रतिभास
मानस्यापिसंसर्गकल्पनायांतत्त्वियत्तायानिश्चेतुमशक्तेः॥तदुक्तं॥संसर्गाद्विविधागश्चे ॥७॥

दयोगोलकवक्षिवत्॥नेदानेदप्यवश्यंचमुक्तिनासर्ववमुक्तिप्तिः॥यदपिपरिणामंसा-
धनंतदप्येकप्रकृतिकेषुघटघटीशरावोदंचनादिष्वनेकप्रकृतिकेषुपटकुंभेटशाका-
दिष्वुपलंभादनैकांतिकमितिनततःप्रकृतिसिद्धिः॥तदेवंप्रधानग्रहणोपायासंभव २
तां॥संभवेवातंतःकार्यादियायोगाच्च॥यदुक्तंपरेणः॥प्रकृतेर्महान्ततोहंकारस्तस्माद्ग-
णश्चषोडशकस्तस्मादपिषोडशकात्पंचभ्यःपंचभूतानीति॥सृष्टिक्रमोमूलप्रकृतिरवि
कृतिर्महदाद्याःप्रकृतिविकृतियःसप्तषोडशकश्चविकारोनप्रकृतिर्नविकृतिःपुरु
षस्तिरूपाभ्यामेवबंधामुतसोरूपवर्णनमिवासद्विषयत्वादुपेक्षामर्हतिः॥अमूर्त्ता-

स्माकाशस्यमूर्त्तस्यसर्वात्मदेशैरेककारणकत्वायोगाच्च॥अन्यथाअचेतनादपिपंचभूत॥
कदंबकाद्धितन्यसिद्धिश्चार्वाकमतसिद्धिप्रसंगात्॥सांख्यंप्रतिवक्तव्येत॥सत्कार्य्यवाद
प्रतिषेधश्चान्यत्रविस्तरेणोक्तइतिनोह्यते॥संहेपरूपत्वादस्येति॥तथाविशेषाएव॥
तत्वंतिषामसमानैरविशेषैरपीशेषात्मनाविशेषात्मकत्वात्सामान्यमेकमनेकत्रव्य २
स्मावर्त्तमानमसंभवाभावाच्च॥तस्यैकव्यक्तिनिष्ठस्यसामस्त्येनोपलब्धेस्तद्यक्तिवदन्यथा
व्यक्तयोपिभिन्नामाभूवन्निति॥ततोबुद्धिभेदाएवसामान्यं॥तदुक्तं॥एकत्रदृष्टोभावोहि॥
क्वचिन्नात्यन्तदृश्यतेतस्मान्नभिन्नमस्त्यन्यत्सामान्यंबुद्ध्यभेदतइतिचविशेषाःपर॥ ॥60॥

स्परसंबंधाएव॥तत्संबंधस्यविचार्यमाणस्यायोगात्॥एकदेशेनसंबंधेअणुत्वेनयुगप
द्योगादणोःषडंशतापत्तेःसर्वात्मनासंबंधेपिंडस्याणुमात्रकत्वापत्तेः॥अवयविनिषे
धाच्चासंबंधत्वमेषामुपपद्यतएव॥तन्निषेधश्चदृष्टविकल्पादिबाधनात्॥तथाहि॥अव
यवाअवयविनिवर्त्ततइति॥नाप्युपगतमवयवीचावयवेषुवर्त्तमानः॥किमेकदेशेन।
वर्त्ततेसर्वात्मनावा॥एकदेशेनेत्तावयवांतरसंगमेत्रापेकदेशांतरेणावयविनोदृष्टा।
मनवस्थासर्वात्मनावर्त्तमानोपिह्यत्पत्तवंस्वावयवेहेनवर्त्ततेतोश्चिदेकरूपेणेति॥अथा
मपक्षेअवयविबहुत्वापत्तिः॥द्वितीयपक्षेत्वअवयवानामेकरूपतापत्तिरिति॥यत्पेकं।

परिसमाप्या॥ दृष्टभावप्रक्षयविरुद्धत्वमिति॥ तथाहि दृश्यंसन्नोपलभ्यते॥ तत्तास्पदवत्यथ
गगनेंदीवरंनोपलभ्यतेचावयवेधवयवीतितथाहृगृह्येयद्बुद्ध्यभावस्तत्तथोनार्थो
तरंयथादृष्टागृहेवनमिति॥ ततश्चनिरंशाणवान्योन्यासंसृष्टिनोरूपादिपरिमाणवः
तेचैकक्षणस्थायिनोनित्याविनाशंप्रत्यनपेक्षणात्॥ प्रयोगश्चायोयद्भावंप्र-
त्यनपेक्षस्तत्स्वभावनियतोयथांत्याकारणसामग्रीस्वकार्येनाशोहिमुद्गरादिना
क्रियमाणस्ततोनिष्पोवाक्रियते॥ निष्पस्करणेघटस्थितिरेवस्यादथविनाशसंबं
धात्तदृष्टइति॥ व्यपदेशाइतिचेत्॥ भावाभावयोःकःसंबंधोनतावत्तादात्म्यंतयोर्भेदा॥ ॥८१॥

त्नापितदुत्पत्तिरभावस्यकार्याधारत्वाघटादिरेवेकृतःस्यात्त
स्यवशागेवनिःपन्नत्वाद्यर्थंकरणमित्यनपेक्षत्वं॥ सिद्धमितिविनाशस्वभावनिय
तत्वंसाध्ययत्येव॥ सिद्धेचानित्यानांतत्स्वभावनियतत्वेतदितरेषामात्मादीनांवि मत्य-
धिकरणभावायत्नानंसत्वादिनासाधनेनतद्दृष्टांताश्चत्येवक्षणस्थितिस्वभावत्वं॥
तथाहि॥ यत्सत्तत्सर्वमेकक्षणस्थितिस्वभावंयथाघटः॥ संतश्चामीभावाइति॥ अथवा
सत्त्वमेवविपक्षेबाधकप्रमाणबलेनदृष्टांतनिरपेक्षमशेषस्यवस्तुनःक्षणिकत्वमनु-
मापयति॥ तथाहि॥ सत्त्वमर्थक्रियायाम्प्रमर्थक्रियायक्रमयोगपद्याभ्यांतेवनित्यान्नि

वर्त्तमानेस्वव्यापारमर्थक्रियामादायनिवर्त्तते॥नापिस्वव्यापंसत्वमितिनित्यस्यक्रमयोग
पद्याभ्यामर्थक्रियाविरोधात्सत्त्वासंभवेविपक्षेबाधकप्रमाणमितिः॥नहिनित्यस्यक्र
मेणयुगपद्वासंभवति॥नित्यस्यैकेनैवस्वभावेनपूर्वापरकालभाविकार्यद्वयंकुर्वतः
कार्यभेदस्वभावानस्यैकस्वभावत्वात्॥तथापिकार्यनानात्वेऽप्यनुत्पन्नकार्यभेदात्कारणा-
भेदकल्पनाविफलैवस्यान्नादृष्ट्याभेकमेवकिंचित्कारणंकल्पनीयंयेनैकस्वभावेने-
कैनैवचराचरमुत्पद्येतइतिचेत्॥अथस्वभावनानात्वमेवतस्यकार्यभेदादिष्यतइतिचेत्॥
हितेस्वभावात्तस्यसर्वदासंभवेनत्तदाकार्यसांकर्य्यमोचेनोत्पत्तिकारणंवाच्यंतस्मा ॥62॥

देवमित्येकस्वभावानुत्पत्तौसत्स्वभावानांसदासंभवात्सैवकार्याणांयुगपत्प्राप्तिः॥सह-
कारिक्रमापेक्षयातत्स्वभावानांक्रमेणभावेनोक्तदोषइतिचेन्नहिनसाधुसंगतं॥नित्य-
स्यसमर्थस्यपरापेक्षयोगात्॥तैःसामर्थ्यकरणेनित्यस्याहानिः॥तस्मात्सिद्धमेवसामर्थ्य
तैर्विधीयतइतिननित्यस्याहानिरितिचेत्तर्हिनित्यमेकंविक्रमेवसात्सहकारिभिर्नि-
सामर्थ्यमेवकार्यकारित्वान्नसंबंधात्तस्यापिकार्यकारित्वेतत्संबधस्यैकस्वभावत्वेसाम
र्थ्यनानात्वान्नकार्यभेदःअनेकस्वभावत्वेक्रमवत्त्वेचकार्यवन्नस्यापिसांकर्य्यमिति
सर्वमावर्त्तते॥इतिचक्रकप्रसंगः॥तस्मान्नक्रमेणकार्यकारित्वेनित्यस्य॥नापियुगप

DR BHAU DA

दन्नोषकार्याणांयुगपदुत्पत्तौद्वितीयज्ञानेकार्यकरणादनर्थक्रियाकारित्वेनावस्तुत्व।
ग्रसंगाद्विप्रतिपत्तिसंशयाभावःसिद्धएवेतिसौगताःप्रतिपेदिरे॥तेपिनयु
क्तवादिनः॥सजातीयेतरव्यावृत्तात्मनांविशेषाणामनंशानांग्राहकप्रमाणस्याभावा
त्॥प्रत्यक्षस्यस्थिरस्थूलसाधारणाकारवस्तुग्राहकत्वेननिरंशवस्तुग्रहणायोगात्॥नहि
परमाणवःपरस्परासंकीर्णाश्चक्षुरादिबुद्धौप्रतिभांति॥तथासत्यवादग्रसंगादथानुभूयं
तएवः॥अथमंतथानुभूताःक्षणाःपश्चान्नुविकल्पवासनाबलादांतराद्रांतरालानुपलंभ।
लक्षणाद्वाह्याद्याविद्यमानोपिस्थूलाद्याकारोविकल्पबुद्धौचकास्तिसचतदाकारेण। ॥८३॥

वुरज्यमानःस्वव्यापारंतिरस्कृत्यग्रत्यक्षव्यापारपुरःसरत्वेनग्रहणत्वात्प्रत्यक्षायतइति॥
तदप्यतिबालविलसितं॥निर्विकल्पबोधस्यानुपलक्षणात्॥गृहीतेहिनिर्विकल्पकेतरा
योर्नदेशभाकारानुरागस्यापन्नकल्पनायुक्ता॥स्फटिकजपाकुसुमयोरिवनान्यथेति
येतेनतयोर्युगपद्ग्रहेःलघुवृत्तेवतिदेकत्वाध्यवसायइतिनिरस्तं॥तस्यापिकोत्रापान
वत्येयत्वादिति॥केनचातयोरेकत्वाध्यवसायोनतावद्विकल्पेनतस्याविकल्पवान्ननि
श्चित्वात्॥नाप्यनुभवेनतस्याविकल्पागोचरत्वात्॥नचतदुभयाविषयंतदेकत्वाध्यव
सायेसमर्थमतिप्रसंगात्॥ततोनग्रत्यक्षबुद्धौतथाविधविशेषावभासः॥नाप्यनुमानबु

धो॥तदविनाभूतस्वभावकार्यलिंगाभावादनुपलंभोसिद्धएवेत्यनुद्घाटाकारस्थूलाकारस्यचोपलब्धेरुक्तत्वात्॥यदपिपरमाणूनामेकदेशेनसर्वात्मनावासंबंधोनोपपद्यत इति॥तत्रापिनन्युपगमएवपरिहारःस्निग्धरूक्षाणांसजातीयानांचद्व्यधिकगुणानां॥ कथंचित्संबंधाकारपरिणामात्मकस्यसंबंधस्यानुपगमात्॥यच्चावयविनिहतिरित्यादिवाधकमुक्तं॥तन्नावयविनोहतिरेवयदिनोपपद्यते॥तदानवर्त्ततइत्यनिधानमेकदेशाद्विकल्पस्यसर्वविशेषांतरनांतरीयकत्वात्॥तथाहि॥नैकदेशेनवर्त्तते॥नापिसर्वात्मनेत्युक्तोऽवकाशांतरेणहतिरित्यनिहितंस्यादन्यथानवर्त्तनइत्येववक्तव्यं॥ ॥७४॥

तिविशेषप्रतिषेधस्यशेषात्मकस्वरूपत्वात्कथंचिदात्मरूपेणहतिरित्यवसीयते तन्नयथोक्तदोषाणामनवकाशाद्विरोधादिदोषश्चाग्रेप्रतिषेत्स्यतइतिनेहप्रतन्यते॥ यच्चैकलक्षणव्याप्तित्वेसाधनं॥योयज्ञानंजनयतीत्याद्युक्तं॥तदप्यसाधनं॥असिद्धादिदोषदुष्टत्वात्॥असत्यानपेक्षत्वंतावदसिद्धं॥घटाद्यज्ञानस्यमुद्गरादिव्यापाराव्यवहितरेकानुविधायित्वात्तत्कारणत्वोपपत्तेः॥कपालादिपर्यायांतरज्ञानाद्घटादेरज्ञानस्यमुद्गरादिव्यापारव्यवहितस्यसकलप्रमाणगोचरातिक्रांतत्वात्॥किंचाज्ञानंयदिस्वतंत्रंनैवेतदानामपेक्षत्वं विशेषणंयुक्तं॥नचसौगतमतेसोस्तिइतिहेत्वप्रयोगानवतारणवानेकांतिकंचेदंस्यात्॥

लिवीजमंकोऽङ्कुरजननंप्रत्यप्यनपेक्षत्वेपितज्जननस्वभावानियतत्वानत्वभा
वेसतीतिविशेषणान्नदोषइतिचेन्नासर्वथापदार्थानांविनाशस्वभावासिद्धेःपर्या
यरूपेणैवहिभावानामुत्पादविनाशावंगीक्रियेतेनऽमरूपेणसमुदेतिविलयमृच्छति
नावोनियमेनपर्ययनयस्यनोदेतिनोविनश्यति॥नावनयालिंगितोनिस्पंदतिवचना-
त्॥नहिनिरन्वयविनाशेपूर्वद्रव्यंसतोमृताछिखिनः॥केकायितंसेवोनरूपेणस्यो-
त्पत्तिरघटतेऽमरूपेणकथंचिदंशकरूपस्यापिसंभवात्ऽऽऽनसर्वथाभावानांविना
शस्वभावत्वंयुक्तंनवऽमरूपसगृहीतमशक्यत्वादभावःतदुद्रव्यंपायसप्रत्यभि- ॥८५॥

ज्ञानसवक्रलमुपलंभात्तत्वामाण्यसचक्षोगोवोक्त्वाऽनुत्तरकार्योत्पत्त्यथानुपपत्तेश्चसि
ऽऽऽद्धत्वात्॥यद्धान्यत्साधनसत्वाक्षंतदपिविपक्षवत्सपक्षेपिसमानत्वान्नसाध्यसिद्धिनि
वंधनंतथाहि॥सत्वमर्थक्रियायामतदर्थक्रियाचक्रमयोगपद्याभ्यांव्याप्तंक्षणिकात्मिवर्त
मानेसत्वाप्यर्थक्रियामादायनिवर्तेतासाचनिवर्तमानासत्वाप्यंसत्वमितिनित्यमेवक्ष
णिकस्यापिखरविषाणवदसत्वमिति॥नतत्रसत्वमवस्थानंक्षणिकस्यवस्तुनःक्रमा-
योमपद्याभ्यामर्थक्रियाविरोधोसिद्धस्तस्यदेशकृतस्यकालकृतस्यवाक्रमस्यासंभवात्
अवस्थितस्यैकस्यहिनानादेशाकालकलाव्यापित्वंदेशक्रमःकालक्रमश्चाभिधीयते॥

नचक्षणिकेसौस्तिायोयत्रैवसतत्रैवयोयदैवतदैवमः॥नहेत्राकालयोर्व्याप्तिर्नविनाभि
हविद्यते॥इतिस्वयमभिधानात्॥नचपूर्वोत्तरक्षणानामेकसंतानापेक्षयाक्रमःसंभव॥
तिसंतानस्यवास्तवत्वेनस्यापिक्षणिकत्वेनक्रमायोगाद्क्षणिकत्वेपिवास्तवत्वेनैवम
त्वादिसाधनमनैकांतिकं॥अवास्तवत्वेनतदपेक्षःक्रमोयुक्तइति॥नापियोगपद्येनता॥
र्थक्रियासंभवति॥युगपदेकेनस्वभावेननानाकार्यकरणेतत्कार्यैकत्वंस्यान्नानास्व
भावकल्पनायांतेस्वभावास्तेनस्वभावेनतद्यद्यसौतेषामेकस्वरूप॥
ता॥नानास्वभावेनचेद्दृश्यते॥अथैकस्मैकस्मोपादानभावाद्यद्यन्नसहकारिभावइ ॥८६॥

तिनस्वभावनेदइष्यते॥तर्हिनित्यस्यैकरूपस्यापिवस्तुनः॥क्रमेणानाकार्यकारिणःस्व
भावनेदःकार्यसांकर्यमाभूत्॥अक्रमात्क्रमिणमनुत्पत्तेर्नैवमितिचेदेकानेत्राकार
णाद्युगपदनेककारणसाध्यानेककार्यविरोधाद्क्रमिणोपिनक्षणिकस्यकार्यकारि॥
त्वमिति॥किंचनयत्पक्षेसतोसतोवाकार्यकारित्वंसतः॥कार्यकर्तृत्वेसकलकालका॥
लव्यापिक्षणानामेकक्षणदृत्तिर्यसंगः॥द्वितीयपक्षेखरविषाणादेरपिकार्यकारित्व
मस्तीत्वाविशेषात्सत्वलक्षणस्याव्यभिचारश्चतस्मान्नविशेषैकांतपक्षेःश्रेयान्॥नापिसा
मान्यविशेषोपरस्परानपेक्षाविति॥योगमतमपियुक्तियुक्तमवभाति॥तयोरन्योन्यनेदे॥

द्रव्योरन्यतरस्मिन्नवस्थापयितुमशक्तेः॥तथाहि॥विशेषास्तावत्द्रव्यगुणकर्मात्मान
सामान्यंत्रयपरापरभेदाद्विविधं॥तत्रपरसामान्यात्सत्तालक्षणाद्विशेषाणांभेदेसत्यपि
रितितथावश्ययोगः॥द्रव्यगुणकर्मणिप्रकृष्यमाणेसत्यादत्तंतन्निमत्वात्सागतावादिव।
दिति॥नसामान्यविशेषसमवायेभ्योनिस्सारः॥तन्नस्वरूपसत्त्वमात्मिन्नन्यैरनुपगमा
त्॥ननुद्रव्यादीनांप्रमाणोपपन्नत्वेधर्मिग्राहकप्रमाणबाधितोहेतुर्यन्हिप्रमाणंनद्र
व्याद्योनिश्चीयंते॥तिनतत्सत्त्वमपीति॥अथनप्रमाणप्रतिपन्नाद्रव्यादयस्तद्धिहेतोरा
श्रयासिद्धिरितितदयुक्तं॥अप्रसंगसाधनात्सागतावादीहिसत्त्वंप्रत्येसत्त्वेनमानमुपलभ्य ॥८७॥

न्तेनतश्चप्रमाणप्रद्रव्यादावनुपगमोव्यापकानुपगमनंतदीयकप्रतिप्रसंगसाधने॥न्न
स्पष्टोघस्सागतावादेतेनद्रव्यादीनामप्यद्रव्यादित्वंद्रव्यत्वादेर्भिन्नंतंबोधयं॥कथंबाध
ल्यंपदार्थानांपरस्परंभेदप्रतिनियतस्वरूपावस्था॥द्रव्यस्यहिद्रव्यमिति॥अपदेशाद्रव्य
त्वादिनासंबंधाविधाने॥ततःपूर्वंद्रव्यस्वरूपंकिंविद्यतेयेनसहद्रव्यत्वादिनासंबंधःस्या
त्॥द्रव्यमेवस्वरूपमितिचेन्नतद्यपदेशाद्रव्यत्वादिनासंबंधनिबंधनतयास्वरूपत्वायो
गात्॥सत्त्वंनिर्द्रव्यरूपमितिचेन्न॥तस्यापिसत्तासंबंधादेवतद्यपदेशकरणादेवंगुणादि।
ष्वपिवाच्यं॥केवलंसामान्यविशेषसमवायानामेवस्वरूपसत्त्वेनतथाव्यपदेशोपपत्तेः॥

तत्त्वयमवस्थेवस्यात्॥ननुजीवादिपदार्थानांसामान्यविशेषात्मकंसाक्षादिभिरभिधीय
तांतयोश्चवस्तुनोभेदाभेदाविति॥तौचविरोधादिदोषोपनिपातान्नैकत्रसंभविताविति
तथाहिभेदाभेदयोर्विधिप्रतिषेधयोरेकत्राभिन्नेवस्तुन्यसंभवः॥शीतोष्णस्पर्शयोरिवे
ति॥नेदमप्यधिकरणमभेदसाध्यादितिवैयधिकरण्यंयदात्मानंपुरोधायभेदो
यंचसमाश्रित्यभेदस्तावात्मानौभिन्नौचाभिन्नौच॥तत्रापितथापरिकल्पमाद्यवस्थाये
नरूपेणभेदस्तेनभेदश्चाभेदश्चेतिसंकरःयेनभेदस्तेनाभेदोयेनाभेदस्तेनभेदइतिव्या
तिकरः॥निहाभेदात्मकत्वेवस्तुनोसाधारणाकारणंनिश्चेतुमशक्तेःसंशयस्ततश्चाप्रति॥ ॥८८॥

पत्तिश्चैस्ततोभावःइत्यनेकांतात्मकत्वेपिनसोष्णमानडादीतिकेचित्॥तेपिनयतीति।
कथादिनःविरोधस्यप्रतीयमानयोरसंभवादनुपलंभसाधोहिविरोधस्तत्रोपलभ्यमा।
नयोःकोविरोधःयद्यशीतोष्णस्पर्शयोरिवेतिदृष्टांततयोक्तंतद्ध्रुवंदहनोष्णत्वया
विनःशीतोष्णस्पर्शस्वभावस्योपलब्धेरयुक्तमेव॥एकस्यचलाचलरक्तारक्तादीनांच
नादिविरुद्धधर्माणांयुगपदुपलब्धेश्चप्रकृतयोरपिनविरोधइति॥एतेनवैयधिकरण्य
मप्यपास्तंतयोरेकाधिकरणत्वेनप्रतीतेरत्रापिचागुक्तनिदर्शनाभ्यामेववोधव्यानिःयद्या
नवस्थानंदूषणंतदपिसाक्षादिमतानभिज्ञैरेवापादितंतन्मतंहिसामान्यविशेषात्मकेव

DR. BHAU DAJI

सुनिसामान्यविशेषावेवनेदः।नेदश्चनिनातयोरेवानिधानाद्द्रव्यमेवेणानेदइतिद्रव्य।
मेवानेदः।एकानेकात्मकत्वाद्वस्तुनः।यद्विवानेदनयप्राधान्येनवस्तुधर्म्माणामानंत्यानाना
नवस्था।।तथाहियत्सामान्यंयश्चविशेषस्तयोरनुवृत्तव्यावृत्ताकारेणानेदस्तयोश्चार्थक्रि
यानेदानद्वेदश्चात्रक्रियानेदात्।सोपसद्भकारिनेदाद्विरूपनंतधर्म्माणामंगीकरणात्।क्रमो
नवस्था।।तथाचोक्तं।मूलक्षतिकरीमाकूरनवस्तांहिदूषणं।वस्त्वानंत्यपिशक्तौघनानव
स्थापिवार्यतइति।योवसंकरमतिकरौतावपिमेचकज्ञाननिदर्शनेनसामान्यविशेष
दृष्टांतेनचपरिहृतौ।।अथतन्नतथाप्रतिनासनं।परस्यापिवस्तुनितथैवप्रतिनासोस्तु ॥८७॥

स्पक्षपातानावात्।निर्णीतिसंज्ञायोपिनयुक्तः।तस्यचलितप्रतिपत्तिरूपत्वादचलितप्र
तिनासेदुर्घटत्वात्।।प्रतिपन्नेवस्तुन्यप्रतिपत्तिरित्यतिसाहसंनपलब्धाविधानादनुपलंने २
पिनसिद्धस्ततोनानावइतिदृष्टेष्टाविरोधमनेकांतशासनं।सिद्धमेतेनावयवावयविनो
र्गुणगुणिनोःकर्म्मतद्वतोश्चकथंचिद्भेदानेदोप्रतिपादितोवोधव्यः।।अथसमवायवशा
द्भिन्नेघण्नेदइतिरनुत्पन्नब्रह्मज्ञल्पमज्ञानमेतिचेत्न।तस्यापिततोनिर्णयेसमव
यायिद्रव्यशक्तेः।तथाहि।समवायइतिःस्वसमवायिषुवृत्तप्रतीतेरवाइतिप्र
त्ययहेतुत्वेनैवहेतुनेरणवानतावदाद्यःपक्षः।समवायेसमवायानभ्युपगमात्।पंचानांसम

वायित्वमितिवचनात्॥इत्यंतरकल्पनायांतदपिसंबंधिषुवर्ततेनवेतिकल्पनायां
इत्यंतरपरंपराश्रयेणेतरावस्थाः॥इत्यंतरमसंबंधिषुइत्यंतरानभ्युपगमात्मानवस्था।
तिचेतर्हिसमवायेपिइत्यंतरंमाभूत्॥अथसमवायोनस्वाश्रयइतिरंगीक्रियते॥तर्हि
सैवात्माश्रितत्वमितिग्रंथोविरुध्यते॥अथसमवायिषुसत्त्ववसमवायइतीतस्मा।
श्रितत्वमितिकल्पते॥तर्हिमूर्तद्रव्येषुसत्त्ववद्दिलिंगमेदमतः॥पूर्वेणइत्याद्दिज्ञानस
काललिंगस्यचपरापरद्रव्ययोस्समज्ञावात्तयोरपितदाश्रितत्वंस्यात्॥तथाचायुक्त।
मेतदुत्पन्नमित्यद्रव्येन्यइति॥किंच॥समवायस्यानाश्रितत्वेसंबंधरूपतयैवनघटेतेतथ २ ॥७०॥

वसंयोगःसमवायोनसंबंधः॥अनाश्रितत्वाद्दिगादिवदिति॥अत्रसमवायस्यधर्मिणः॥
कथंचित्तादात्म्यरूपस्यानेकस्यचपरैःप्रतिपन्नत्वाद्धर्मिणोहकत्वमाणवाधाभ्यामाश्रया
सिद्धिश्चनवाच्येतितस्याश्रितत्वेप्येतद्दिनिधीयते॥नसमवायएकःसंबंधात्मकत्वेसत्या
श्रितत्वात्संयोगवत्॥सत्तयानेकांतइतिसंबंधविशेषणे॥अथसंयोगेतेविरुमिथल २
द्रव्यत्वयनानात्वान्नानात्वंनात्मनित्वविपर्ययाद्दितिचेत्न॥समवायेप्युत्पत्तिमत्वमश्वर।
त्वद्रव्यत्वयनानात्वप्रसंगात्॥संबंधिभेदाद्भेदोनत्रापिसमानइतिनैकत्रैवपर्य्यनुयो
गोयुक्तस्तस्मात्समवायस्यपरपरिकल्पितस्यविचारसहत्वान्नतद्ग्राकुणागुणादिष्व।

नेदमितीति ॥ अथ भिन्नजातिनामादव्यवायवयवादीनां नेहाविति चेन्न नेदमितिनामसंस्
नेहाविरोधात् ॥ घटपटादीनामपि कथंचिद्भेदोपपत्तेः ॥ सर्वथा जातिनामनेदस्यासिद्धेश्च ॥
इदमित्याद्यनेदजातिनामसंस्यापि भावान्नतः कथंचिद्भेदानेदात्मकं द्रव्यपर्यायात्मकं सा
मान्यविशेषात्मकं च तत्त्वं प्रतीतिरदर्शिभिरुन्नीयेतायातमित्यलमतिप्रसंगेन ॥ इदानी
मनेकांतात्मकवस्तुसमर्थनार्थमिदमुच्यते हेतुद्वयमाह ॥ ॥ अनुवृत्तव्यावृत्तप्रत्ययगोचरत्व
त्पूर्वोत्तराकारपरिहारवाप्तिस्थितिलक्षणपरिणामेनार्थक्रियोपपत्तेश्चेति ॥ अनुवृत्ता
कारोहि गौर्गौरित्याद्यनुवृत्तप्रत्ययः व्यावृत्ताकारः शाबलेयादिव्यावृत्तप्रत्ययस्तयोर्गोचरस्त ॥ ९१ ॥

स्मात्तत्त्वं तस्मादेतेन तिर्यक्सामान्यव्यतिरेकलक्षणविशेषद्वयात्मकं वस्तुसाधि
तं ॥ पूर्वोत्तराकारयोर्यथासंख्यं परिहारावाप्तीतात्मस्थितिः सैवलक्षणं यस्य स चासौ
परिणामश्चेतेनार्थक्रियोपपत्तेश्चेत्यनेनतूर्ध्वतासामान्यपर्यायाख्यविशेषद्वयरूपं वस्तु
सूपपत्तिमद्भवति ॥ अथ प्रथमोहिष्टसामान्यनेदं दर्शयन्नाह ॥ ॥ सामान्यं द्वेधा तिर्यगूर्ध्व
तानेदात् ॥ अथमनेदं सोदाहरणमाह ॥ ॥ सदृशपरिणामस्तिर्यक्खंडमुंडादिषु गोत्ववत् ॥
तत्रैकस्मिन्पशौ गोत्वादेरनेकस्मिन्योगपद्यात्सामर्थक्रियाविरोधात् ॥ प्रत्येकं परिसमाप्ता
व्यक्तिषु वृत्तिर्योगाद्यानेकं सदृशपरिणामात्मकमेवेति तिर्यक्सामान्यमुक्तं ॥ द्वितीयनेद

पिसदृष्टांतमुपदर्शयति॥ननु॥परापरविवर्त्तव्यापिद्रव्यमूर्त्तामूर्त्तादिवत्सामान्यादिष्विति॥सामान्य
मितिवर्त्ततेतेनायमर्थऊर्द्धतासामान्यंनवति॥किंतर्हिद्रव्यंतदेवविशिष्यते॥परापरविवर्त्त॥
व्यापीति॥पूर्वापरकालवर्त्तित्रिकालानुयायीत्यर्थः॥विशेषज्ञानसैकस्ययुगपद्नानानेक
स्वगतनीलाद्याकारव्यापित्वदेकस्यक्रमनाद्यपरिणामव्यापित्वमित्यर्थः॥विशेषस्यापिद्वै
विध्यमुपदर्शयति॥विशेषश्चेति॥द्वयेत्यधिक्रियमाणेनानिसंबंधस्तदेवघटतिपादयति
॥पर्यायव्यतिरेकनेदाहिति॥यथमविशेषनेदमाह॥एकस्मिन्द्रव्येक्रमनाविनःपरि
णामाःपर्यायाःआत्मनिहर्षविषादाहिवदिति॥अत्रात्मद्रव्यंस्वदेहप्रमितिमात्रमेवन॥ ॥एश॥

व्यापकंनापिवटकणिकामात्रं॥नचकायाकारपरिणतनूतकदंवकमिति॥तत्रव्यापक
त्वेपरेषामनुमानमात्माव्यापकः॥द्रव्यत्वेसत्यमूर्त्तत्वादाकाशवदिति॥तत्रयदिरूपादि
लक्षणंमूर्त्तत्वंतत्रतिषेधोमूर्त्तत्वंतदामनसानिकांतः॥अथासर्वगतद्रव्यपरिणामंमूर्त्ति
त्वं॥तन्निषेधस्तथाचेत्परंप्रतिसाध्यसमोहेत्वः॥यच्चापरमनुमानमात्माव्यापकः॥अणुप
रिमाणानधिकरणत्वेसतिनित्यद्रव्यत्वादाकाशवदिति॥तदपिनसाधुसाधनमणुपरि
णामानधिकरणत्वमित्यत्रकिमयंनञर्थः॥पर्य्युदासःप्रसज्योवानेति॥तत्राद्यपक्षेऽणु
परिमाणप्रतिषेधेनमहापरिमाणमध्यंतरपरिमाणंपरिमाणमात्रंवा॥महापरिमाणंचे॥

त्साध्यसमोदेशत्वांतरपरिमाणेचेद्धिरुद्धोदेशत्वांतरपरिमाणऽधिकरणत्वंह्यव्यापक
त्वमेवसाधयतीतिपरिमाणमात्रंचेत्तत्परिमाणसामान्यमंगीकर्त्तव्यं॥तथाचाणुपरिमा
णव्यतिरेकेणपरिमाणसामान्याधिकरणत्वमात्मनऽत्युक्तं॥तच्चानुपपन्नं॥अधिकर॥
णसिद्धिश्चसंगान्नहिपरिमाणसामान्यमात्मतिव्यवस्थितं॥किंत्वपरिमाणव्यक्तिरेवेति
नचावांतरमहापरिमाणद्वयाधारितयात्मन्यवस्तित्वेपरिमाणमात्राधिकरणतातत्र
निश्चेतुंशक्या॥दृष्टांतश्चसाधनविकलत्वाकाशस्यमहापरिमाणाधिकरणतयापरिमा
णमात्राधिकरणत्वायोगात्॥नित्यऽत्वंचसर्वथासिद्धंनित्यसंक्रमाक्रमाभ्यामर्थ॥ ॥एत्र॥

क्रियाविरोधादिति॥असऽपक्षेपिहस्तादावसंग्रहणोपायासंभवात्॥नविशेषणत्वं॥ना
वागृहीतविशेषणंनामनागृहीतविशेषणविशिष्टेबुद्धिरितिवचनान्नवऽत्पक्षं॥तऽहृ
णोपायः॥संबंधानावादिंद्रियार्थसन्निकर्षऽहिऽत्पक्षंतन्नतेनसिद्धं॥विशेषणविशेष्य
भावकल्पनायामभावस्यागृहीतस्यविशेषणत्वमिति॥तदेवऽदूषणं॥तस्मान्नव्यापक
मात्मऽत्वंनापिवटकणिकामात्रं॥कर्मनीयकांताकुचऽवनसंस्पर्शकालेऽतिलोमकू
पमाल्हादनाकारस्यसुखस्यानुभवादत्यंतासर्वगुणेगंधादिकार्योदयायोगादाशुद्र
व्यालातवक्रवत्॥क्रमेणेवतत्सुखमित्यनुपपन्नं॥परापरांतः॥करणसंबंधस्यतत्कारण

डाक्टर भाऊदाजी दास्मारक
DR BHAU DAJI
MEMORIAL

स्मृकल्पनायांव्यवधानप्रसंगादन्यथासुखस्मानसंघत्पन्नत्वायोगादितिनापिष्टथिव्या
दिवत्तदात्मकत्वमात्मनःसंभाव्यते।।अचेतनेभ्यश्चैतन्योत्पत्तियोगाद्धारणेरणइवो
ष्मतालक्षणान्वयानावाद्धा।।तदहङ्कृतिवालकस्यस्तनादावभिलाषानावयसंगाच्च।।अ
भिलाषेष्टिप्रत्यभिज्ञानेनयतिं।।तच्चस्मरणेस्मरणंद्वानुभवेनभवतीतिपूर्वानुभावःसिद्धः।।
मध्यदशायांतथैवव्याप्तेःमृतानांरक्षायत्वादिकुलेषुस्वयमुत्पन्नत्वेनकथयतांदर्शनि २
त्।।केषांचिद्भवस्मृतेरुपलंभाद्यानादिश्चेतनःसिद्धएवातथाचोक्तं।।तदहङ्कृस्तिनेहातो
रक्षोदृष्टेर्नवस्मृतेः।।मृतानन्वयनात्सिद्धःप्रकृतिज्ञःसनातनइति।।तच्चखंदेहश्चमितिरा ॥एध॥

मेत्पन्नापिप्रमाणाभावात्।।सर्वत्रसंशयइतिवक्तव्यं।।तत्रानुमानस्यसज्ञावात्।।तथाहि।।
देवदत्तात्मातद्देहएव।।तत्रसर्वत्रैवचविद्यते।।तत्रैवतत्रसर्वत्रैवस्वासाधारणगुणाधारत
योपलंभपते।।सोयत्रैवतत्रसर्वत्रैवच रणगुणाधारतयोपलभ्यते।।सतत्रैवतत्रसर्व
त्रैवचविद्यते।।यथादेवदत्तगृहएवतत्रसर्वत्रैवचोपलभ्यमानः।।स्वासाधारणानामुरुत्वादि
गुणः।।यदीयः।।तथाचायंतस्मात्तथेति।।तदसाधारणगुणज्ञानदर्शनमुखवीर्यलक्षणस्ते
चसर्वांगीणास्तत्रैवचोपलभ्यंते।।सुखमाल्हादनाकारंविज्ञानंमेयबोधनंशक्तिःक्रियानु
मेयास्याश्चनःकांतासमागमइतिचचमात्।।तस्मादात्मास्वदेहइतिरेवस्थितः।।द्वितीयं।

विशेषमेदमाह॥अर्थांतरगतोविसदृशपरिणामोव्यतिरेकोगोमहिषादिवदिति।वै
सादृश्यंहिप्रतियोगिग्रहणसत्येवभवति।नचापेक्षितत्वादस्यावस्तुत्वमवस्तुन्यपेक्षिक
त्वायोगादपेक्षायावस्तुनिष्ठत्वात्॥सात्कारलांछितमबाध्यमनंतधर्मसंदोहवर्मि
तविशेषमपिवस्तुमेयंदेवैःप्रमाणबलतोनिरूपयितव्यंसंक्षिप्तमेवमुनिनिर्दिष्टंमयेे
तत्॥इतिपरीक्षामुखमलघुहृतौविषयसमुद्देशश्चतुर्थः॥४॥अथेदानींफलविप्र
तिपत्तिनिरासार्थमाह॥अज्ञाननिवृत्तिर्हानोपादानोपेक्षाश्चफलं।द्विविधेहिफलं।
साक्षात्पारंपर्येणेति।साक्षादज्ञाननिवृत्तिः।पारंपर्येणहानादिकमितिवस्तुमेयनिश्चयोत्तर ॥९५॥

कालनाविरुद्धात्तस्येति।तद्विविधमपिफलंप्रमाणाद्भिन्नमेवेतियोगाः।अभिन्नमेवेति।
सौगतास्तन्मतव्यवस्थानिरासेनस्वमतंव्यवस्थापयितुमाह॥प्रमाणादभिन्नंभिन्नंचफ।
लंविदेतेदसमर्थनार्थंहिवस्तुमाह॥अयःप्रभृतिभ्यएवनिवृत्तोज्ञानोऽज्ञानात्मादनेनेपो।
द्घातेघातयतीतिः।अयमर्थोयस्यैवात्मनःप्रमाणकारणपरिणतिस्तस्यैवफलरूपतया
परिणामइत्येकप्रमात्रपेक्षयाप्रमाणफलयोरभेदःकरणक्रियापरिणामभेदाश्रिद्रू
पस्यसामान्यसिद्धत्वान्नोक्तं।पारंपर्येणसाक्षाच्चफलंहेयोपादेयोपेक्षणीयं।देवैर्भिन्नम।
भिन्नंचप्रमाणान्नदिष्टोदितं॥इतिपरीक्षामुखमलघुहृतौफलमयुद्देशःपञ्चमः५

अथेदानीमुक्तप्रमाणस्वरूपादिचतुष्टयानामसमाहृतानतोऽनुक्तदानासमिति।ततश्चोक्ता-
तुक्तप्रमाणस्वरूपसंख्याविषयफलेतरादादन्यद्विपरीतंतदाभासमिति।तत्रक्रमप्राप्तंस्वरू-
पाभासंदर्शयति।।अस्वसंविदितिगृहीतार्थदर्शनंसंशयादयःप्रमाणाभासाः।।अस्वसं-
विदितंचगृहीतार्थंचदर्शनंचसंशयआदियेषांतेसंशयादयश्चेतिसर्वेषांद्वंद्वः।।आदिग्रा-
हेणविपर्ययानध्यवसाययोरपिग्रहणं।।तत्रास्वसंवेदितंज्ञानंज्ञानांतरंजनयेदित्ये-
नैयायिकाः।।तथाहि।।ज्ञानंस्वव्यतिरिक्तवेदनवेद्यं।।वेद्यत्वात्घटवदिति।।तदसंगतं।।धर्मि
ज्ञानमज्ञानांतरवेद्यत्वेसाध्येतः।।पातित्वेनधर्मित्वायोगात्।।स्वसंविदितत्वेतेनैवहेतो।। ।।९९।।

रनेकांतात्।।महेश्वरज्ञानेनचव्यभिचाराच्चामिज्ञानेनाप्यनेकांतादर्थप्रतिपत्त्ययोगाच्च।न
हिज्ञापकमप्रत्यक्षंज्ञाप्यंगमयतिग्राह्यलिंगादीनामपितथेष्यगमकत्वप्रसंगादनंतर।
नाविज्ञानग्राह्यत्वेतस्याप्यगृहीतस्यपरज्ञापकत्वानदंतरंकल्पनीयं।।तत्रापिनदंतर।
मित्यनवस्था।।तस्मान्नायंपक्षःश्रेयान्।।एतेनकरणज्ञानस्यपरोक्षत्वेनास्वसंविदितत्वं।
ब्रुवन्नपिमीमांसकःप्रत्युक्तः।।तस्मादितरोर्थप्रत्यक्षत्वायोगादर्थकर्मत्वेनाप्रतीयमान
त्वादप्रत्यक्षत्वं।।तर्हिफलज्ञानस्याप्रत्यक्षतातत एवस्यात्।।अथफलत्वेनप्रतिभासनान्नो
क्तदोषः।।करणज्ञानस्यापिकरणत्वेनावभासनात्प्रत्यक्षत्वमस्तु।।तस्मादर्थप्रतिपत्त्यन्यथानुप

पत्तेः। करणज्ञानकल्पनावदर्थप्रत्यक्षत्वान्यथानुपपत्तेर्ज्ञानस्यापिप्रत्यक्षत्वमस्तु॥
अथकरणस्यचक्षुरादेरप्रत्यक्षत्वेपिरूपाकट्वादिनिश्चयइतिचेन्न। भिन्नकर्तृका-
करणस्यैवतच्चनिश्चयादभिन्नकर्तृकेकरणेसतिकर्तृप्रत्यक्षतायांतदभिन्नस्यापि
करणस्यकथंचित्प्रत्यक्षत्वेनाप्रत्यक्षैकांतविरोधात्स्वकाश्यात्मनोप्रत्यक्षत्वेप्रदीपप्र
त्यक्षत्वविरोधविदितिः। एहीतग्राहिधारावाहिज्ञानेगृहीतार्थदर्शनंसौगतानिमतं।
निर्विकल्पकंतच्चस्वविषयमुपदर्शकत्वादध्यक्षं। व्यवसायस्यैवतज्ज्ञानितस्यतदु
पदर्शकत्वादर्थव्यवसायस्यप्रत्यक्षाकारेणानुरक्तत्वात्ततःप्रत्यक्षस्यैवव्यपदेशं। व्य॥ ॥९७॥

वसायस्तुगृहीतग्राहित्वादव्यवसायमिति॥ तन्नसुनायितं। दर्शनस्यापिकल्पकस्यानुपल-
क्षणतत्सज्ञावायोगात्सज्ञायेवानीलादाविवक्षणक्षयादावपितदुपदर्शकत्वप्रसंगात्।
नविपरीतसमारोपान्नेतिचेन्नहिसिद्धं। नीलादौसमारोपविरोधिग्रहणलक्षणोनिश्चयइ
तितदात्मकमेवव्यवसायमितरत्तदाभासमितिसंशयादयश्चव्यवसिद्धाएव॥ तन्नसंशय
ज्ञनयकोटिसंस्पर्शीस्थाणुर्वापुरुषोवेतिपरामर्शोविपर्ययःपुनरत्रसिंहइतिविकल्पः
विशेषानवधारणमनध्यवसायः। कथमेषामस्वसंविदितादीनांतदाभासतेत्यनाहःस्व
स्वविषयोपदर्शकत्वान्नावादिति॥ गतार्थमेतत्॥ अत्रदृष्टांतंयथाक्रममाहःस्व॥ पुरुषो।

तरपूर्वार्थगतत्वेनस्पर्शिनाणुपुरुषादिज्ञानवत्॥पुरुषांतरंचपूर्वार्थमिश्चगच्छत्वेनस्प
र्शिश्चथाणुपुरुषादिश्चतेषांज्ञानंतद्विषयतद्वत्॥अपरेचसन्निकर्षादिनंप्रतिदृष्टांतम २
द्वाहुश्चक्षुरसयोर्द्वयेसंयुक्तसमवायवच्च॥अयमर्थःयथाचक्षुरसयोःसंयुक्तसमवाय
सन्नपिनग्रमाणंतथाचक्षुरसयोरपितस्मादयमपिग्रमाणंनामाणवेति॥उपलक्षणमेत
त्॥अतिव्याप्तिकथनमव्याप्तिश्चसन्निकर्षग्रत्यक्षवादिनां॥चक्षुषिसन्निकर्षस्यासंभवात्
॥अथचक्षुःप्राप्तार्थपरिच्छेदकंअव्यवहितार्थग्राहकत्वात्॥प्रदीपादिव्यवहितत्तिमेहरि
तिमितंतदपितसाधीयः॥कावाभ्रपटलादिव्यवहितार्थनामपिचक्षुषाग्रहनामसंबंधोर ॥एए॥

सिद्धेः॥ग्राह्यावंशमसोरेककालदर्शनानुपपत्तिग्राह्येश्चनवतन्नक्रमेपियोगपद्यात्॥
मानइतिवक्तव्यं॥कालव्यवधानानुपलब्धेः॥किंच॥क्रमपत्तिपतिःग्राप्तिनिश्चयेसतिनव
ति॥नचक्रमग्राप्तौग्रमाणंतरमस्ति॥तेनसत्वमस्तीतिचेन्नतस्यासिद्धेः॥अथचक्षुषोऽसं
रूपादीनांमध्येरूपस्यैवग्रकाशकत्वात्प्रदीपवदिति॥तदप्यपर्यालोचितनिधानं॥म
णेंद्रनादेःपार्थिवत्वेपिरूपग्रकाशकत्वदर्शनात्॥एथिव्यादिरूपग्रकाशकत्वेएथिव
द्यास्वत्वग्रसंगाच्च॥तस्मात्सन्निकर्षस्याव्यापिकत्वान्नग्रमाणत्वं॥करणज्ञानेनव्यवधाना
चेति॥ग्रत्यक्षानामसमाहः॥अथेत्याद्यग्रत्यक्षंतदानासंवोऽस्माकमाधूमदर्शनाद्वह्निविज्ञा

DR BHAU DAJI LIBRARY

नवदिति॥परोक्षानुमानमाह॥अन्वयेपिपरोक्षंतदानीमीमांसकस्यकरणज्ञानवदि
ति॥अनुपपद्यमानमित्यत्॥परोक्षनेदानीमनुपदर्शयन्॥अथमंत्रमप्रामाण्यंस्मरणानुमा
ह॥अतस्मिंस्तदितिज्ञानंस्मरणमनिंद्रियेतदेवदत्तोयथेति॥अतस्मिन्ननमनु भू-
तदित्यर्थः॥शेषंमुगमं॥अत्यक्षानुमानमाह॥सदृश्योतदेवदंतस्मिन्नेवतेनसदृश्यं॥
मलकवदित्यादिप्रत्यभिज्ञानानामं॥द्विविधंप्रत्यभिज्ञानानामनुपदर्शितमेकत्वनिबं
धनंसादृश्यनिबंधनंचेति॥तत्रैकत्वेसादृश्यवनामः सादृश्येचैकत्ववनामसदानाम
मिति॥तर्कानामाह॥असंबद्धतद्ज्ञानंतर्कानामंयावांस्तुन्नःसन्नुपामइतियथा ॥९९॥

तद्ज्ञानमितिव्याप्तिलक्षणंसंबंधज्ञानमित्यर्थः॥इदानीमनुमानानामाह॥इदमनु
मानानामं॥इदंस्वरूपमाणमितिभावः॥तत्रतदवयवानामोपदर्शनेनसमुदायरूपानुमा
नानामनुपदर्शयितुकामः॥अथमावयवानामाह॥तत्रानिष्टादिःपक्षानामः इष्टम-
बाधितमित्यादि॥तल्लक्षणमुक्तमिदानींतद्विपरीतंतदानाममितिकथयति॥अनिष्ट २
मीमांसकस्यानित्यःशब्दः॥असिद्धादिपरीतंतदानामाह॥सिद्धःश्रावणःशब्दइति
अबाधितविपरीतंतदानामेमेवेदयन्॥सचप्रत्यक्षादिबाधितएवेतिदर्शयन्नाह॥ब
बाधितःप्रत्यक्षानुमानागमलोकस्ववचनैः॥एतेषांक्रमेणोदाहरणमाह॥तत्रप्रत्य-

दादिवाधितोयथाऽनुमोनिर्ईश्वत्वाज्जालवत्।स्पर्शनेत्वत्पक्षेणद्व्यणुकस्पर्शात्मकोनि।
रनुमूयेते॥अनुमानवाधितमाह॥छ॥अपरिणामीशब्दःकृतकत्वात्घटवत्इति॥अत्र
पक्षोऽपरिणामीशब्दःकृतकत्वादित्यनेनवाध्येते॥आगमवाधितमाह॥छ॥प्रेत्यासुखञ्च
दोधर्म्मःपुरुषाश्रितत्वादधर्म्मवदिति॥आगमेहिपुरुषाश्रितत्वाविशेषेपिपरलोकेध
र्म्मस्यसुखहेतुत्वमुक्तं।लोकवाधितमाह॥छ॥शुचिनरशिरःकपालंघाणंगत्वाच्छंखशु
क्तिवदिति॥लोकेहिघ्राणंगत्वेपिकस्यचिच्छुचित्वमशुचित्वंच।तन्ननरकपालादीना।
मशुचित्वमेवेतिलोकवाधितत्वं।स्ववचनवाधितमाह॥छ॥मातामेवंध्यापुरुषसंयोगेप ॥१००॥

र्भत्वात्त्वसिद्धवंध्यावदिति॥इदानींहेत्वाभासानुक्रमापन्नानाह॥छ॥हेत्वाभासाअसि
द्धविरुद्धानैकांतिकाकिंचित्कराः॥एषांयथाक्रमेणलक्षणंसोदाहरणमाह॥छ॥असत्स
त्तानिश्चयोसिद्धः॥सत्तायानिश्चयश्चसत्तानिश्चयोऽसंतोसत्तानिश्चयोयत्सत्तवत्सत्स
त्तानिश्चयः॥तत्रप्रथमंभेदमाह॥छ॥अविद्यमानसत्ताकःपरिणामीशब्दश्चाक्षुषत्वात्।क
थमस्यासिद्धत्वमित्याह॥छ॥स्वरूपेणासत्वात्॥द्वितीयासिद्धभेदमुपदर्शयति॥छ॥अविद्य
माननिश्चयोमुग्धबुद्धिंप्रत्यग्निरत्रधूमादिति॥अस्यापिसिद्धताकथमित्यत्रैकायामाह।
छ॥तत्सत्तावास्यादिनावेनभूतसंघातेसंदेहात्॥तस्येतिमुग्धबुद्धिंप्रतीत्यर्थः॥अपरमसिद्ध

नेदमाह॥छ॥सांख्यंप्रतिपरिणामीशब्दःकृतकत्वादितिशब्दस्यासिद्धतायांकारणमाह॥छ॥
तेनाज्ञातत्वादितितेनसांख्येनाज्ञातत्वात्तमंतेह्यविनाभावेनसिद्धोनोत्प
त्त्यादिरितिशब्दस्यानित्यत्वमित्यर्थः॥विरुद्धंहेत्वाभासमुपदर्शयन्नाह॥छ॥वि॥
परीतनिश्चितावितानावोविरुद्धशब्दःपरिणामीशब्दःकृतकत्वात्॥कृतकत्वंह्यपरिणाम॥
विरोधिनापरिणामेनव्याप्तमितिशब्दस्यानैकांतिकहेत्वाभासमाह॥छ॥विपक्षेपिविरुद्धवृत्ति
रनैकांतिकः॥शब्दशब्दत्वंकेवलंपक्षसपक्षयोरितिदृष्टंसचद्विविधोविपक्षेनिश्चित
वृत्तिःशंकितवृत्तिश्चेति॥तत्राद्यंदर्शयन्नाह॥छ॥निश्चितवृत्तिरनित्यःशब्दःप्रमेयत्वात् ॥१०१॥

घटवत्इतिकथमस्यविपक्षेनिश्चितावृत्तिरित्याशंक्याह॥छ॥आकाशेनित्येपस्यनिश्च॥
यात्॥शंकितवृत्तिमुदाहरति॥छ॥शंकितवृत्तिस्तुनास्तिसर्वज्ञोवक्तृत्वादिति॥अस्यापि
कथंविपक्षेवृत्तिराशंक्यतेइत्यत्राह॥छ॥सर्वज्ञत्वेनवक्तृत्वाविरोधादिति॥अविरोधश्च॥
ज्ञानोत्कर्षेवचनानामपकर्षदृष्टेरिति॥निरूपितप्रायः॥अकिंचित्करस्वरूपंनिरूप
यति॥सिद्धेयत्पदादिवाधितेचसाध्येहेत्वाभासःकिंचित्करइति॥उदाहरति॥छ॥सिद्धःश्रावण
शब्दःश्रावणत्वादिति॥कथमित्याकिंचित्करत्वमित्याह॥छ॥किंचिदकरणादिति॥अप
रंचैनंदृष्टांतीकरणद्वारेणोदाहरति॥छ॥यथानुमेयोनिर्ईश्वरत्वादित्यादौकिंचि

कर्तुमशक्यत्वादकिंचित्करत्वमितिशेषः॥अयंचदोषोहेत्वलक्षणविशेषणवत्वा
दकालइतिव्यक्तीकुर्वन्नाह॥छ॥लक्षणएवासौदोषोमुत्पन्नप्रयोगस्यपक्षदोषोवदुष्ट
त्वादिति॥दृष्टांतोन्वयव्यतिरेकनेदाद्विविधइत्युक्तंतत्रान्वयदृष्टांतानामाह॥छ॥
दृष्टांतानामान्वयेनसिद्धसाध्यसाधनोभयाःसाध्यंचसाधनंचउभयंचसाध्यसाधनोभ
यानि॥असिद्धानितानियेघतिविग्रहः॥एतानेकत्रैवानुमानेदर्शयति॥छ॥अपौरुषेयःश्रा
द्धोमूर्त्तत्वादिंद्रियसुखपरिमाणघटवत्॥इंद्रियसुखमसिद्धसाध्यंतत्पौरुषेयत्वात्॥प॥
रमाणुसिद्धसाधनंतत्समूर्त्तत्वात्॥घटश्चासिद्धोनयः॥पौरुषेयत्वामूर्त्तत्वाच्च॥साध्यमात्रं॥ ॥१०२॥

साधनंदर्शनीयमितिदृष्टांतावसरेप्रतिपादितं॥तद्विपरीतदर्शनमपितदाभासमित्याह॥
छ॥विपरीतान्वयश्चयदपौरुषेयंतदमूर्त्तंकृतीस्पर्शतदाभासेत्याह॥विद्युदादिनातिव्य
भिचारादिति॥तस्याप्यमूर्त्तताग्निरित्यर्थः॥व्यतिरेकोदाहरणाभासमाह॥छ॥व्यतिरेकेसिद्ध
स्तद्विपरीतःपरमाणुरिंद्रियसुखाकाशवदिति॥अपौरुषेयःश्राद्धोमूर्त्तत्वादित्यत्रैवासि
द्धः॥साध्यसाधनोभयव्यतिरेकायत्रेतिविग्रहः॥तत्रासिद्धसाध्यव्यतिरेकःपरमाणुस्त
पौरुषेयत्वादिंद्रियसुखमसिद्धसाधनव्यतिरेकंआकाशंत्वसिद्धोभयव्यतिरेकमितिभा
भाभावेसाधनमाहनिरितिव्यतिरेकोदाहरणघटकेरणापितंतत्रतद्विपरीतमपितदा

मासमित्युपदर्शयति॥छ॥व्यपरीतव्यतिरेकश्चयत्नामूर्त्ततन्नापौरुषेयमिति॥बालप्र॥
त्पत्यर्थं॥तत्रयोपगमइत्युक्तमिदानीतान्प्रतिरेवक्रियद्धीनतायांप्रयोगानामसमाह॥छ॥
बालप्रयोगानामःपंचावयवेषुक्रियद्धीनताः॥तदेवोदाहरति॥छ॥प्रतिमानयंदेशोधूम
वत्वाद्यद्विछंतद्विछंायथामहानसमित्यवयवत्रयप्रयोगसतीत्यर्थः॥यत्रत्रयवप्रयोगो
तदानासत्वमाह॥छ॥धूमवांश्चायमितिवा॥प्रवयववविपर्ययेपित्वेतेमाह॥छ॥तस्माद्ग्नि
वानधूमवांश्चायमिति॥कथमवयववविपर्ययेप्रयोगानासइत्यारेकायामाह॥छ॥सप्त
याप्रकृतप्रतिपत्तेरयोगात्॥इदानीमागमानासमाह॥छ॥रागद्वेषमोहाक्रांतपुरुषवच्च ॥१०२॥

नाप्तातमागमानासंउदाहरणमाह॥छ॥यथानद्यास्तरिमोदकरणश्रेयःसंतिधावध्वंमा॥
णवकाः॥कश्चिन्माणवकैराकुलीकृतचेतासत्संगपरिहिंहीर्षयाप्रतारणावाक्येनना॥
वादेशंतान्प्रलापयतित्यासोक्तेरप्यवादागमानासत्वंप्रथमोदाहरणमात्रेणात्रप्रप्तु॥
दाहरणांतरमाह॥छ॥संगुल्पगिहस्तियूथप्रातमासेइति॥प्रत्रापिसांख्यपशुःस्वदुरागम
ज्ञानितवासनाहितचेताद्वेष्टविरुद्धंसर्वंसर्वत्रविद्यतइतिमत्पमानस्तथोपदिशतीत्य
नासवचनत्वादिदमपितथेत्यर्थः॥कथमनंतरमोक्तियोसदानासत्वमित्यारेकायामा
ह॥छ॥विसंवादात्॥प्रविसंवादरूपप्रमाणलक्षणाभावान्नतद्विशेषरूपमपीत्यर्थः॥इ

DR. BHAU DAJI LAD MUSEUM MEMORIAL

दानींसंख्यानामसमाह॥छ॥प्रत्यक्षमेवैकंप्रमाणमित्यादिसंख्यानामं॥प्रत्यक्षपरोक्षनेदात्
द्वैविध्यमुक्तं॥तद्वैपरीत्येनप्रत्यक्षमेवप्रत्यक्षानुमानेएवेत्यादिवधारणंसंख्यानामं॥प्रत्य
क्षमेवैकमितिकथंसंख्यानामसमित्याह॥छ॥लौकायतिकस्यप्रत्यक्षतः॥परलोकादिनि
षेधस्यपरबुद्ध्यादेश्चासिद्धेरतद्विषयत्वात्॥अतद्विषयत्वात्॥अप्रत्यक्षविषयत्वादित्य
र्थः॥शेषंसुगमं॥अथवैतमेवैतत्संख्याविप्रतिपत्तिनिराकरणइतिनेहपुनरुच्यते॥इत्ता
रवादिप्रमाणोपन्यासवधारणमपिविघटतइतिलौकायतिकदृष्टांतद्वारेणतन्मतेपिसंख्या
नामसमितिदर्शयतिग्रंथकारः॥छ॥सौगतसांख्ययोगप्रभाकरजैमिनीयानांप्रत्यक्षानुमानागमोपमा ॥१०४॥

नार्थापत्त्यभावैरेकैकाधिकैर्व्याप्तित्वं॥यथाप्रत्यक्षादिभिरेकैकाधिकैर्व्याप्तिःप्रतिषेद्धुं न
शक्यते॥सौगतादिभिस्तथाप्रत्यक्षेणलौकायतिकैःपरबुद्ध्यादिरपीत्यर्थः॥अथपरबुद्ध्या
दिप्रतिषेधःप्रत्यक्षेणमानूदप्रमाङ्गविप्रतिषेधइत्याशंक्याह॥अनुमानादेस्तद्विषयत्वे
प्रमाणांतरत्वं॥तच्छब्देनपरबुद्ध्यादिरुच्यते॥अनुमानादेः॥परबुद्ध्यादिविषयत्वेप्रत्या
क्षैकप्रमाणवादोदीयतेइत्यर्थः॥अत्रोदाहरणमाह॥छ॥तर्कस्येवव्याप्तिग्राहकत्वेप्रमा
णांतरत्वंप्रमाणस्याविसंवादकत्वात्सौगतादीनामितिशेषः॥किंवप्रत्यक्षैकप्रमा
णवादिनाप्रत्यक्षाद्येकैकाधिकप्रमाणवादिनिश्चयसंवेदनेंद्रियप्रत्यक्षेणेदानुमानेने

दश्चप्रतिनामनेदमेववक्तुमोगत्यंतरानावात्।सचतइदोलोकायतिकः।प्रतिपत्पक्षानु
मानयोरितरेषांव्याप्तिज्ञानप्रत्यक्षादिप्रमाणेघितिसर्वेषांप्रमाणसंख्याविघटनेनतदेवदर्श
यति।छ।प्रतिनामनेदमघनेदकत्वादिति।इदानींविषयानामनुपदर्शयिष्यमाह।छ।विष
यानामःसामान्यंविशेषोघयंवास्वतंत्रमितिकथमेषांतदानासतेत्याह।छ।तथाप्रतिना।
सनात्कार्य्यकरणाच्च।किंचतदेवकोनात्मकंतत्त्वंस्वयंसमर्थमसमर्थंवाकार्यकारिस्यात्
प्रथमपक्षेदूषणमाह।छ।समर्थस्यकरणेसर्वदोत्पत्तिरनपेक्षत्वात्सहकारिसान्निध्या।
त्तत्करणानेतिचेदत्राह।छ।परापेक्षणेपरिणामित्वमन्यथातदनावात्।वियुक्तावस्थाया ॥१०५॥

मकुर्वतः।सहकारिसमवधानवेलायांकार्यकारिणःपूर्वेनिराकारपरिहारव्याप्तिस्थिति
लक्षणपरिणामोपपत्तेरित्यर्थः।अन्यथाकार्यकरणानावात्।त्यागनावावस्थायामिवेत्प
र्थः।अथद्वितीयपक्षेदोषमाह।छ।स्वयमसमर्थस्यकारकत्वात्पूर्ववत्।अथफलान२
संप्रकाशायमाह।छ।फलानासंघमाणहनिर्नमिन्नमेववा।कुतःपक्षद्वयेपितदानास
तेत्याशंकामामाद्यपक्षेतदानासत्वेहेतुमाह।छ।अनेदेतद्व्यवहारानुपपत्तेःफलमेवघ।
माणमेववानवेदितिनावः।व्याहत्यासंहत्यपरनामधेययातत्कल्पनास्वित्याह।छ।व्या
हत्यापितत्कल्पनाफलांतराद्याहत्याफलत्वप्रसंगात्।अयमर्थोयथाफलाविज्ञाती

यात॥फलसमवाहृत्याफलमवहारस्तथाफलांतरादपिसजातीयाद्याहृतिरुपस्तीत्यफ
लत्वमत्रैवातिदेशेदृष्टांतमाह॥छ॥अमाणांतराद्याहृतेवाअमाणत्वमेति॥अत्रापिश्रा
क्तनीत्यवघक्रियायोजनीया॥अनेनदेशेनिराकृत्यग्राचार्यउपसंहरति॥छ॥तस्माद्यस्त
वोनेदमिति॥नेदमेवंदूषयन्नाह॥छ॥नेदेत्वामांतरवत्तदनुपपत्तेः॥अथयत्रैवात्मनि अ
माणंसमवेतंफलमपितत्रैवसमवेतमितिसमवायलक्षणत्यासत्याअमाणफलमव
स्थितिरितिनात्मांतरेतिसंगच्छतिवेतदपिनमृक्तमित्याह॥छ॥समवायेतिअसंगच्छति
समवायस्यनित्यत्वाद्व्यापकत्वाच्च॥सर्वात्मनामपिसमवायसमानधर्मकत्वान्नततः॥अति ॥१०६॥

नियमइत्यर्थः॥इदानींस्वपरपक्षसाधनदूषणमवस्थामुपदर्शयति॥छ॥अमाणतदान २
सीकुष्टतयोक्तावितौपरिहृतापरिहृतदौसौवादिनःसाधनतदाभासौअतिवादिनोदूषण
भूषणेच॥वादिनाअमाणमुपन्यस्तंतच्चअतिवादिनाकुष्टतयोक्तावितंपुनर्वादिनापरिहृ
तंतदेवतस्यसाधनंभवति॥अतिवादिनश्चदूषणमिति॥यदाअतिवादिनाअमाणानामयु
क्तोअतिवादिनातत्रैवोक्तावितंवादिनाचापरिहृतंतदातद्वादिनःसाधनाभासोभवति
अतिवादिनश्चभूषणमिति॥छ॥अथोक्तप्रकारेणशेषविअतियत्तिनिराकरणद्वारेणअ
माणतत्वंअअतिज्ञातंपरीक्षनयादित्वमन्यत्रोक्तमितिदर्शयन्नाह॥छ॥संभवदन्यद्वि

रणीयमिति॥संग्रहविधिमानमन्यत्सामाणतत्वान्तयस्वरूपंशास्त्रांतरप्रसिद्धंविचारणीय
मिहयुक्त्याप्रतिपत्तव्यं॥तत्रमूलनयौद्वौद्रव्यार्थिकपर्यायार्थिकनेदात्तत्रद्रव्यार्थिकस्त्रिधा
नैगमसंग्रहव्यवहारनेदात्॥पर्यायार्थिकश्चत्रुर्धा॥ऋजुसूत्रशब्दसमभिरूढैवंभूतनेदा
त्॥अन्योन्यगुणप्रधाननूतनेदानेदस्वरूपणोनैगमः॥नैकंगमोनैगमइतिनिरुक्तेः॥सर्वथा
नेदवादस्तदाभासः॥प्रतिपत्तव्यपेक्षः॥सन्मात्रग्राहीसंग्रहः॥वाह्यवादस्तदाभासः॥संग्रहगृ
हीतकोव्यवहारः॥काल्पनिकोनेदस्तदाभासः॥शुद्धपर्यायग्राहीऋजुसूत्रः॥प्रतिपत्तापेक्षः॥ऋजु
सूत्रःक्षणिकोकांतनयःतदाभासः॥कालकारकलिंगाद्यनेदाच्छब्दस्यकथंचिदर्थनेद ॥१०७॥

कथनंशब्दनयः॥अर्थनेदंविनाशब्दानामेवनानात्वैकांतस्तदाभासः॥पर्यायनेदात्पद
र्थनानात्वनिरूपकः॥समभिरूढः॥पर्यायनानात्वमंतरेणापींद्रादिनेदकथनंतदाभासः
क्रियाश्रयेणनेदस्वरूपणमिष्टंनावः॥क्रियानिरपेक्षत्वेनक्रियावाचकेषुकाल्पनिको
व्यवहारस्तदाभासइतिएतन्नयतदाभासलक्षणंसंक्षेपेणोक्तंविस्तरेणनयचक्रात्प्र
तिपत्तव्यं॥अथवासंग्रहविधिमानमन्यदादलक्षणंयत्रलक्षणंवान्यत्रोक्तमिहद्रष्टव्यं॥त
थाचाहुःसमर्थवचनंवादइति॥प्रसिद्धावयवंवाक्यंस्वेष्टार्थस्यसाधकंसाधुगूढपदार्थं
पत्रमाक्षरमाकुलमिति॥इदानीमात्मनःशास्त्रनिर्वहणमोक्षत्यपरिहारंवदन्नाचार्यआह॥

छ॥परीक्षामुखमादर्शंहेयोपादेयतत्वयोः संविदेमादृशोबालपरीक्षादक्षबुद्धयेऽ॥म
धोक्षतवानस्मिकिमर्थंसंवेदेकस्मादृशः॥अहंचकथंनूतमित्याहबालोमंदमतिः॥अ
नौद्धत्यसूचकंवचनमेतत्॥तत्वज्ञत्वंचशास्त्रनिर्वहणादेवावसीयते॥किंतत्परीक्षामु
खंतदेवनिरूपयति॥आदर्शमितिकयोः हेयोपादेयतत्वयोः॥यथैवादर्शोज्ञातमनोलं
कारमंडितमसंदिग्धंवस्तुरूपंवाघटतिविवोपदर्शनिर्घोरणसूचयति॥तथेदमपिहेयोपा
देयतत्वंसाधनदूषणोपदर्शनिर्घारणनिश्चायकतित्यादर्शत्वेननिरूप्यते॥कइवपरीक्ष
दक्षबत्॥परीक्षादक्षइवयथापरीक्षादक्षःशास्त्रज्ञास्तेनिरूढवांस्तथाहमपीत्यर्थः

छ॥अकलंकशशांकेर्यत्पदकटीकृतमखिलमाननिननिकरं॥तत्संक्षिप्तंसूरिनिरुप
मनिनिर्वक्तुमेतेनाः॥इतिपरीक्षामुखलघुवृत्तौप्रामाण्यनामःप्रथमुद्देशःषष्ठपरिच्छे
दः॥श्रीमान्वेडायनामानूदग्रणीर्गुणशालिनां॥वदरीपालवंशालिनोमद्यमणिरु
द्भितः॥तदीयपत्नीनुविविश्रुतासीन्नाणांवनामागुणशालधीमा॥यारेवतीतिष्ट
थितंविकेतिपत्नावतीतिघवदंतसंतः॥तस्यामनूद्विश्वजनीनवृत्तिर्दानांबुवाहोनुवि
हीरयाख्यः॥स्वगोत्रविस्तारनभोंशुमालीसम्पत्करन्नानरणार्चितांगः॥तस्योपरोधा
वशतोविशोधकीर्तेर्मणिक्यनंदिकृतशास्त्रमगाधबोधं॥स्पष्टीकृतंकतिपयैर्व

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

DR. BHAU DAJI MEMORIAL

चनैरुद्दारैर्बालप्रबोधकरमेतदनंतवीर्यैः॥४॥इतिप्रमेयरत्नमालापरनामधेयापरीक्षा॥
मुखशुद्धिः समाप्ता॥ ॥पुस्तकमिदं मुदयचंद्रेण स्वपठनार्थं लिपीकृतमिति॥
परार्थं वा॥ ॥शुभंभवतु॥ ॥श्रीरस्तु॥ ॥कल्याणमस्तु॥ ॥श्री॥